# Shri Ramaprapattishatakam

# શ્રીરામપ્રપત્તિશતકમ્

## Document Information

Text title : Shri Ramaprapattishatakam

File name : rAmaprapattishatakam.itx

Category : raama, shataka, prapatti

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH 04-20

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીરામપ્રપત્તિશતકમ્

કલ્યાણાદ્રિમહાધીરઃ કલ્યાણગુણવારિધિઃ ।
કલ્યાણરામઃ કૃપયા કલ્યાણાનિ કરોતુ નઃ ॥

રાજરાજશિરોરત્નરાજનીરાજિતાઙ્ઘ્રયે ।
રાજદ્રાજીવવક્ત્રાય રામરાજાય મઙ્ગલમ્ ॥

યઃ કોસલેન્દ્રદુહિતુઃ સુકૃતેન સાક્ષા-
    જ્જાતો હરિસ્તનુભવો દિવિ વાસવાદ્યૈઃ ।
અસ્માન્ જગચ્ચ વિનુતઃ પરિપાલયેતિ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧॥

વૃન્દારકા યદુદયે પ્રમદાદયોધ્યાં
    સન્તાનકલ્પકુસુમૈઃ પરિતો વવર્ષુઃ ।
ગન્ધર્વજાતિરતિગાનરતા બભૂવ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨॥

યસ્યોદયે મનુજલોકશુભોદયોઽભૂત્
    સર્વં ક્ષણેન જગતો દુરિતં પ્રશાન્તમ્ ।
ચક્રુર્મુદા નટનમપ્સરસઃ પ્રકામં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩॥

યસ્યાદ્વિતીયમનઘં શુભદં ભયઘ્નં
    મુક્તિપ્રદં શ્રવણમઙ્ગલમાર્તિહારિ ।
રમ્યં સમુલ્લસતિ નામ જગત્પવિત્રં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪॥

યં લક્ષ્મણેન ભરતેન ચ સાનુજેન
    બાલ્યે સહાભિવિહરન્તમવેક્ષ્ય દૃષ્ટ્યા ।
પ્રાપુર્ન તૃપ્તિમવશાઃ પ્રમદેન લોકા-

સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫॥

યઃ શૈશવે કનકમૌક્તિકનીલરત્ન-
માણિક્યવજ્રવરભૂષણભૂષિતાઙ્ગઃ ।
લોકાન્ પ્રરઞ્જયતિ કુઞ્જરમઞ્જુગત્યા
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬॥

યઃ શૈશવે મધુરસૂક્તિસુધાપ્રવાહૈ-
ર્લોકસ્ય કર્ણહૃદયાનિ મુહુર્નિષિચ્ય ।
ચક્રે નિરાકૃતસુરાધિપભાગ્યમેનં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭॥

યં શૈશવાતિરમણીયસુભદ્રવેષ-
માકર્ણદીર્ઘનવરક્તસરોજનેત્રમ્ ।
ધન્યા બભૂવુરવલોક્ય દૃશૈવ પૌરા-
સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮॥

યં શૈશવે નયનસૌખ્યદચારુલીલા
કન્દર્પકોટિકમનીયનરાવતારમ્ ।
ધન્યા બભૂવુરવલોક્ય દૃશૈવ પૌરા-
સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯॥

યં મૌક્તિકાભરણસુન્દરમન્દહાસં
નવ્યપ્રવાલરુચિરાધરશોભમાનમ્ ।
ધન્યા બભૂવુરવલોક્ય દૃશૈવ પૌરા-
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦॥

યઃ શૈશવે કુશિકજેન મખાવનાય
નીતોઽનુજેન સહ સંપ્રતિપન્નમન્ત્રઃ ।
મધ્યાહ્નભાસ્કર ઇવાતિતરાં રરાજ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૧॥

બાલ્યે સમસ્તજનતાવધકારિવૃત્તિં
યસ્તાટકાં સ્ત્રિયમપીભસહસ્રવીર્યામ્ ।
હત્વા સલીલમકરોદ્ભુવનં પ્રહૃષ્ટં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૨॥

યસ્તાટકાનિધનહૃષ્ટમુનિપ્રદિષ્ટા-
    ન્યસ્ત્રાણ્યગણ્યમહિમાનિ ચિરન્તનાનિ ।
સાક્ષાદ્વિધાય ચ મનોવશગાનિ ચક્રે
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૩॥

પૌગણ્ડ એવ વયસિ પ્રબલં સુબાહું
    યઃ કેસરીવ કરિણં સમિતૌ નિહત્ય ।
મારીચમબ્ધિમનયત્ સહસા શરેણ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૪॥

યો મૈથિલેન્દ્રનગરીમભિયાતુકામ-
    સ્ત્રિસ્રોતસં દ્યુપથિકાં કુશિકાત્મજોક્તામ્ ।
શૃણ્વન્ મુમોદ ભૃશમાત્મકુલીનભૂપાન્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૫॥

યો ગૌતમાખ્યમુનિયોષિતમાત્મકાન્ત-
    શાપોરરીકૃતશિલાવપુષં ક્ષણેન ।
ચક્રે સ્વપાદરજસા તટિદાભદેહાં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૬॥

યો ગૌતમાત્મજસમીરિતગાધિસૂનુ-
    બ્રાહ્મણ્યસઙ્ગમકથાશ્રુતિહૃષ્ટચેતાઃ ।
શ્લાઘ્યસ્તમેવ સુચિરં હૃદયે નનન્દ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૭॥

દેવાસુરૈરપિ દુરાસદમીશચાપં
    ભઙ્ક્ત્વા મૃણાલમિભરાડિવ લીલયા યઃ ।
સદ્યશ્ચકાર જનકં સફલપ્રતિજ્ઞં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૮॥

યો જાનકીપરિણયે સ્વશિરો વિનમ્ય
    દોર્ભ્યાં તદઙ્ઘ્રિસરસીરુહમશ્મમૌલૌ ।
આરોપ્ય તન્મુખમવેક્ષ્ય જહાસ મન્દં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૯॥

યો મૈથિલેન્દ્રનગરાત્ સ્વપુરં પ્રયાસ્યન્
    માર્ગે ગૃહીતપરશું ભૃગુજં સચાપમ્ ।

વ્યદ્રાવયદ્ધૃતશરાસનદર્પવીર્યં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૦॥

યો ભ્રાતૃભિસ્ત્રિભિરુદૂઢવધૂસમેતૈ-
    ર્હૈમપ્રસાધિતવલદ્દ્વિરદાધિરૂઢઃ ।
સાકેતમેત્ય ધરણીસુતયૈવ રેમે
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૧॥

યો માતુલાલયમતિપ્રમદેન સાકં
    સંપ્રેષયન્ સસહજં ભરતં સ્વપિત્રોઃ ।
શુશ્રૂષયા ચિરમશેષજનપ્રિયોઽભૂત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૨॥

યસ્તાતમાતૃવચનાવિતથીકરસ્તં
    સામ્રાજ્યભોગમનપેક્ષ્ય સહાનુજેન ।
વધ્વા યયૌ વનમશેષજગદ્ધિતાય
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૩॥

યો નવ્યશાદ્વલતલે મૃદુપાદગત્યા
    ગઙ્ગામુપેત્ય ગુહમાનિત ઉત્તરંસ્તામ્ ।
હિત્વા ગુહં સરથસૂતમભૂજ્જટાલ-
    સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૪॥

યસ્તજ્જનેન સહ સોદરજાનકીભ્યાં
    તીર્ત્વા પ્લવૈઃ સસલિલાઃ સરિતશ્ચ બહ્વીઃ ।
રેમે પુરીવ સુદૃશા સહ ચિત્રકૂટે
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૫॥

યો માતુલસ્ય નિલયાદ્વનમાગતેન
    પાદાનતેન ભરતેન પુરાગમાય ।
સંપ્રાર્થિતોઽપિ ગમનં મનસાપિ નૈચ્છત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૬॥

યો રાજ્યપાલનકૃતે મણિપાદુકે સ્વે
    દત્ત્વા નતાય ભરતાય ચ સાન્ત્વપૂર્વમ્ ।
પુર્યૈ નિવર્ત્ય તમભૂત્ પરમપ્રહૃષ્ટ-
    સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૭॥

યઃ સાનુજો વનિતયા સહ ચિત્રકૂટં-
    ત્યક્ત્વાત્રિમસ્ય ચ વધૂં પ્રણિપત્ય તાભ્યામ્ ।
દત્તં વિભૂષણકુલં મુમુદે પ્રગૃહ્ય
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૮॥

યો દણ્ડકાવનમુપેત્ય ખલં વિરાધં
    હત્વા વિદેહતનયામમિતપ્રમોદામ્ ।
કૃત્વા તુતોષ શરભઙ્ગકૃતામિતાશીઃ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૨૯॥

યો વૈ સુતીક્ષ્ણમુનિના સમનુગૃહીતઃ
    કુમ્ભોદ્ભવં સમભિવાદ્ય મુદા ચ તસ્માત્ ।
તૂણીં શરાસનમસિં પ્રતિલભ્ય રેજે ।
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૦॥

યો દણ્ડકાવનતપોનિરતૈર્મુનીન્દ્રૈ-
    રભ્યર્થિતો નિખિલરાક્ષસનાશનાય ।
તેભ્યસ્તથેતિ દયયા વિદધે પ્રતિજ્ઞાં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૧॥

યો યાતુધાનનિધને વિધૃતપ્રતિજ્ઞઃ
    કાલં વ્યપેક્ષ્ય નિવસન્ વરપઞ્ચવટ્યામ્ ।
મિત્રં જટાયુષમવાપ્ય તુતોષ કામં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૨॥

યો દુર્મતિં ઝટિતિ શૂર્પણખાં વિભીકાં
    સ્વસ્મિન્ સગર્ભકરચૂર્ણિતકર્ણનાસામ્ ।
કૃત્વા મુમોચ દયયા વિપિને સજીવાં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૩॥

યો દૂષણત્રિશિરસૌ ચ ખરં તદીયં
    સૈન્યં ચતુર્દશગુણોક્તસહસ્રસઙ્ખ્યમ્ ।
એકો નિહત્ય મુમુદે સહસા જયેન
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૪॥

યઃ પઙ્ક્તિકન્ધરહૃતાં મૃગયન્ સ્વકાન્તાં

તસ્યાઃ કૃતે ખગપતિં પથિ મુક્તજીવમ્ ।
દગ્ધ્વા સ્વતાતવદમુષ્ય દદૌ ચ મુક્તિં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૫॥

યો ભક્ષિતું સ્વમનુજં ચ કૃતપ્રયત્નં
દગ્ધ્વા કબન્ધમપિ યોજનદીર્ઘબાહુમ્ ।
શ્રુત્વા તદુક્તશબરીચરિતો નનન્દ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૬॥

યસ્તાપસીં સસહજઃ શબરીમુપેત્ય
તત્કલ્પિતપ્રચુરપૂજનલબ્ધહર્ષઃ ।
તદ્ભુક્તશેષફલભુક્ પ્રમુમોદ કામં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૭॥

યો વ્યાધયોષિદભિસૂચિતમૈત્રપાત્રં
સુગ્રીવમેવ મૃગયન્ સમુપેત્ય પમ્પામ્ ।
તત્રાઞ્જનેયમભિગૃહ્ય નનન્દ ગાઢં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૮॥

યો વાયુસૂનુઘટિતાતુલમૈત્રહૃષ્ટ
સુગ્રીવદત્તનિજદારવિભૂષણાનિ ।
દૃષ્ટ્વા તુતોષ રમણીમિવ વીક્ષ્ય સાક્ષાત્
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૩૯॥

યો મિત્રપુત્રકથિતાગ્રજવૈરદુઃખ-
નિર્મોચનોદિતમનાઃ કરુણારસાબ્ધિઃ ।
હન્યાં તમાશ્વિતિ દદાવભયં ચ તસ્મૈ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૦॥

યો મિત્રમોદવિધયે સહસૈકકેન
બાણોત્તમેન વિનિહત્ય મહેન્દ્રપુત્રમ્ ।
સુગ્રીવમેવ કપિરાજ્યપદેઽભ્યષિઞ્ચત્
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૧॥

યો ભૂમિશૈલનિલયાન્ જનકેન્દ્રપુત્ર્યાઃ
સમ્માર્ગણાય સહસા કપિનાયકેન ।
આનાથિતાન્ કપિવરાન્ મુમુદે સમીક્ષ્ય

તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૨॥

યઃ સૌરિણા કપિવરેષુ દિશશ્ચતસ્રઃ
પ્રસ્તાવિતેષુ કૃતિનં હનુમન્તમેવ ।
જ્ઞાત્વા કરેઽસ્ય વિતતાર નિજાઙ્ગુલીયં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૩॥

યત્પ્રાભવાદિતરકીશવરૈરલઙ્ઘ્ય-
વારાન્નિધિં પથિ વિધૂનિતમાર્ગવિઘ્નમ્ ।
વેશન્તવલ્લઘુ તતાર સમીરસૂનુ-
સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૪॥

લઙ્કામુપેત્ય નિશિ રાક્ષસકોટિગુપ્તાં
કેનાપ્યદૃશ્યગતિરેવ યદીયભૂમ્ના ।
રક્ષોઽવરોધમનિલાત્મભવશ્ચચાર
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૫॥

યત્પાદપદ્મયુગલસ્મરણો હનૂમાન્
સીતાં વિલોક્ય ચ વિતીર્ય વરાઙ્ગુલીયમ્ ।
ચૂડામણિં સમુપગૃહ્ય મુદં પ્રપેદે
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૬॥

યત્પાદચિન્તનબલાદ્દશવક્ત્રકાન્તા-
લીલાવનં લઘુ વિભજ્ય સમીરસૂનુઃ ।
તત્પાલકાનપિ નિહત્ય જયી મુમોદ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૭॥

યત્પાદસંશ્રયબલાત્ પવમાનસૂનુઃ
સેનાપતીન્ ઝટિતિ પઞ્ચ ચ મન્ત્રિપુત્રાન્ ।
સપ્તાક્ષમપ્યતિબલં સુલભં જઘાન
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૮॥

યત્પાદસેવનબલેન હિ મરુત્કુમારો
બ્રહ્માસ્ત્રબન્ધનમપીન્દ્રજિતા પ્રયુક્તમ્ ।
નિર્ધૂય પઙ્ક્તિવદનં ચ તૃણાય મેને
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૪૯॥

યત્પાદવારિજયુગસ્મૃતિવૈભવેન
    વાલાગ્રસીમ્નિ દશકન્ધરદીપિતેન ।
વૈશ્વાનરેણ પવનાત્મભવો ન દેહે (ભુવો ન દાહઃ)
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૦॥

યત્પાદપદ્મવિનતિપ્રભવપ્રભાવાત્
    પશ્યત્સુ રાક્ષસગણેષ્વપિ વાયુસૂનુઃ ।
ભસ્મીચકાર રુચિરામવિશઙ્ક્ય લઙ્કાં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૧॥

યત્પાદસંસ્તુતિબલેન સુતોઽનિલસ્ય
    ભસ્માવશેષવિભવાં પ્રવિધાય લઙ્કામ્ ।
તીર્ત્વાબ્ધિમુત્તરતટં પુનરાજગામ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૨॥

યત્પાદભક્તિમહિમાતિશયેન વાયોઃ
    પુત્રોઽઙ્ગદાદિકપિભિઃ સહ દુષ્પ્રવેશમ્ ।
ભૂત્વા વિભોર્મધુવનં ચ પપૌ મધૂનિ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૩॥

યત્સન્નિધિં સમુપગમ્ય મરુત્તનૂજઃ
    પાદામ્બુજં સવિનયં સહસા પ્રણમ્ય ।
દૃષ્ટા મયા જનકજેતિ જગાદ મોદાત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૪॥

યો મારુતેર્નિજવધૂકુશલપ્રવૃત્તિં
    ચૂડામણિં ચ સમવાપ્ય પરં પ્રહૃષ્ટઃ ।
સર્વસ્વદાનસદૃશં પરિષસ્વજે તં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૫॥

યઃ સ્વાનુજાર્કજસમીરજશક્રભૂજ-
    નીલાદિભિઃ કપિવરૈઃ સહ મન્ત્ર્યમાણઃ ।
લઙ્કાં શુભંયુદિવસે ચકમેઽભિગન્તું
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૬॥

યઃ પાવમાનિમધિરુહ્ય મુદા સ્વયં તં
    તારાસુતં સમધિરૂઢવતાનુજેન ।

સમ્ભાષમાણ ઇનજેન યથાવવાર્ચીં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૭॥

યઃ સર્વરાક્ષસવિભેદનબદ્ધદીક્ષૈ-
    ર્વૃક્ષાયુધૈર્હરિબલપ્રવરૈઃ પરીતઃ ।
તીરં યયૌ સપદિ દક્ષિણવારિરાશે-
    સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૮॥

પઙ્ક્ત્યાનનાનુજજુષેઽપિ વિભીષણાય-
    સ્વાઙ્ઘ્રિદ્વયીસરસિજં શરણં ગતાય ।
યોઽદાચ્ચિરાયુરપિ રાક્ષસરાજલક્ષ્મીં
    તે રામમાર્તિહરણં શરણં ભજામિ ॥ ૫૯॥

ગમ્ભીરમાત્મનિ પરાઙ્મુખમમ્બુધિં યઃ
    ક્રુદ્ધો વિશોષ્ય વિશિખેન શિખિપ્રભેણ ।
તત્પ્રાર્થિતઃ પુનરમું સ્વવશં નિનાય
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૦॥

અબ્ધિં નલેન હરિભિર્લઘુ બન્ધયિત્વા
    તીર્ત્વા તમાશુ નિખિલૈઃ સહ વાનરૈર્યઃ ।
લઙ્કાં નિરુચ્છ્વસનમારુરુધે સમન્તાત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૧॥

યો વજ્રદંષ્ટ્રમતિદુષ્ટમકમ્પનં ચ
    ધૂમ્રાક્ષમક્ષયમુખાનપિ રાક્ષસેન્દ્રાન્ ।
રક્ષોબલાધિપતિમપ્યહનત્ પ્રહસ્તં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૨॥

યો લીલયા યુધિ નિકૃત્તરથધ્વજાક્ષ-
    સેનાકિરીટશરચાપમતિક્ષતાઙ્ગમ્ ।
રક્ષોઽધિરાજમકરોદપિ કાન્દિશીકં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૩॥

યઃ કુમ્ભકર્ણમચલં મઘવાનિવાશુ
    બાણૈશ્ચ મૂર્ધ્નિ પદયોરપિ ચૂર્ણયિત્વા ।
શોકામ્બુધાવલમમજ્જયદાશરેન્દ્રં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૪॥

યો દેવતાન્તકનરાન્તકરાતિકાય-
    કુમ્ભત્રિશીર્ષકનિકુમ્ભમહોદરાદીન્ ।
સંહાર્ય વાનરગણૈર્મુમુદે જયેન
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૫॥

યઃ શોણિતાક્ષમકરેક્ષણમત્તયુદ્ધો-
    ન્મત્તાન્ વિરૂપનયનાદિનિશાચરેન્દ્રાન્ ।
સંહારયન્ કપિવરૈર્મુદમાપ ગાઢં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૬॥

નામ સ્મરન્ મનસિ યસ્ય સમીરપુત્રો
    ગત્વાન્તરં જલધિમેકમુહૂર્તમાત્રાત્ ।
દિવ્યૌષધાદ્રિમુપગૃહ્ય પુનઃ સમાગાત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૭॥

યઃ પાકશાસનજિતં સમુપાત્તમાયં
    યજ્ઞક્રિયાર્થમુપવિષ્ટનિકુમ્ભિલાન્તમ્ ।
સંહાર્ય સમ્મુદમવિન્દત લક્ષ્મણેન
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૮॥

યઃ સ્યન્દનેભતુરગાલિપદાતિપૂર્ણાઃ
    સન્નદ્ધમૂલબલસઙ્ઘપરાર્ધકોટીઃ ।
યામાર્ધતઃ પ્રતિજઘાન સુલીલયૈક-
    સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૬૯॥

યઃ કૌણપેશ્વરશિરાંસિ દશોજ્જ્વલાનિ
    કૃત્તાનિ ચૈકશતમઙ્કુરિતાનિ ભૂયઃ ।
દૃષ્ટ્વા નનન્દ શતકણ્ઠતપઃપ્રભાવં-
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૦॥

યો વાસવપ્રહિતમાતલિસંપ્રણીતં
    દિવ્યં રથં સમભિનન્દ્ય મુદાધિરુહ્ય ।
તેજોવૃતો વિરુરુચેઽસુરહેવ(મઘવેવ) સાક્ષાત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૧॥

યઃ સંયુગે દશમુખં નિશિતૈઃ સ્વબાણૈ-

રાપાદમસ્તકમતીવ ગવાક્ષિતાઙ્ગમ્ ।
કૃત્વાપિ નિશ્ચલમવેક્ષ્ય બભાર હર્ષં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૨॥

સઙ્ગ્રામભુવ્યરિજયાય ઘટોદ્ભવેન
પ્રીત્યોપદિષ્ટમુપગૃહ્ય રવિસ્તવં યઃ ।
તેજો વહન્ યુધિ બભૌ રિપુદુર્નિરીક્ષં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૩॥

રક્ષોઽધિપાન્તકરણેઽતિવિચક્ષણોઽપિ
યો માત? ? વતિતરાં સમનુગ્રહીતુમ્ ।
આજ્ઞાપિતાસ્ત્રમરિનાશકમેવ મેને
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૪॥

યોઽસ્ત્રેણ પદ્મજનુષઃ ક્ષણદાચરેન્દ્રં
દ્વેધૈવ વક્ષસિ વિભિદ્ય નિપાત્ય ભૂમૌ ।
લોકાખિલાર્તિમપનીય ભૃશં નનન્દ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૫॥

યત્સંહૃતો દશમુખોઽપ્યતિપાપકર્મા
સદ્યો વિધૂતકલુષોઽધિક(દીપિતાત્મા) ।
સાયુજ્યમુક્તિમગમદ્વરયોગિગમ્યાં
તે રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૬॥

યઃ સાપરાધિનમપિ ક્ષણદાચરેન્દ્રં
સંહૃત્ય સંપ્રકટયન્ સ્વકૃપાલુતાં યઃ (યમ્) ।
તેજોમયં સ્વપદમેવ સમાનિનાય ।
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૭॥

નિર્વર્ત્ય ચાશ્રુતમથાશુ વિભીષણં યો
લઙ્કાધિપત્યપદ એવ મુદાભિષિચ્ય ।
સઙ્ગ્રામમૂર્ધ્નિ વિજયી વિરરાજ ધન્વી
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૮॥

યોઽભ્યર્થિતોઽપરિચયેઽપિ વિભીષણેન
તં માનયન્ સકરુણં નિજસાન્ત્વવાક્યૈઃ ।
પૂજાં જહર્ષ સુહૃદાં હૃદિ કારયિત્વા

તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૭૯॥

સૌશીલ્યનિર્જિતવસિષ્ઠવધૂસ્વભાવાં
પ્રાણપ્રિયાં નિજવધૂમપિ ધર્મબદ્ધઃ ।
નિન્દન્ વપુસ્ત્રિજગતીમનલો ન મેને (? )
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૦॥

યસ્મૈ ભિયા હુતવહો નિજસાત્કૃતાઙ્ગી-
મત્યાદૃતાંશુકવિભૂષિતદિવ્યદેહામ્ ।
અઙ્કે વહન્ પુનરદાદવનીતનૂજાં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૧॥

સંવીક્ષ્ય યં વિજયિનં શિવપદ્મજેન્દ્ર-
વૈવસ્વતામ્બુપતિવૈશ્રવણાદિદેવાઃ ।
કલ્પપ્રસૂનનિકરૈઃ સમુદોઽભ્યવર્ષં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૨॥

રામ પ્રસીદ રઘુવીર રણાગ્રધીર
રક્ષઃકુલાન્તક વિભો વિજયી ભવેતિ ।
યઃ સંસ્તુતોઽખિલસુરૈર્વિરરાજ વીરઃ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૩॥

યસ્ત્ર્યમ્બકેણ ધુરિ દર્શિતમાત્મતાતં
દૃષ્ટ્વા સમુજ્જ્વલવિમાનગતં પ્રણમ્ય ।
અઙ્કે ધૃતઃ સપદિ તેન નનન્દ કામં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૪॥

યઃ પૂર્વમાત્મગુરુણા ભરતે વિતીર્ણં
શાપં તમેનમભિવાદ્ય ચ તત્પ્રસાદાત્ ।
સમ્મોચયન્ તમતનોત્તદનુગૃહીતં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૫॥

ઉજ્જીવયન્ પુનરપિ પ્રહતાન્ સમીકે
કીશાન્ સુરોત્તમવરચ્છલતઃસુરેષુ ।
યો વૈભવપ્રકટનાય મુદાન્વિતોઽભૂત્
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૬॥

યઃ પુષ્પકં સમધિરુહ્ય વધૂસહાયઃ
    સાકં નિજાનુજવિભીષણભાનુસૂભિઃ ।
અન્યૈર્હરીન્દ્રનિકરૈઃ સ્વપુરીં પ્રતસ્થે
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૭ ॥

ગચ્છન્ પુરીં દિવિ વિમાનગ એવ વધ્વૈ
    યુદ્ધે દશાનનમુખારિવધસ્થલાનિ ।
સન્દર્શયન્ સહ તયા મુમુદે ભૃશં ય-
    સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૮ ॥

યો વાયુજાગમમહસ્કરપુત્રમૈત્રીં
    ભિલ્લપ્રિયાર્ચનવિધિં ચ મહીસુતાયૈ ।
જલ્પન્નિમાં વ્યધિત વિસ્મિતચિત્તવૃત્તિં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૮૯ ॥

યશ્ચોદિતો વનિતયા કપિવર્યપુર્યાં
    તારામુખાઃ કપિવધૂઃ પરિભૂષિતાઙ્ગીઃ ।
આનાય્ય યાનમધિરોપ્ય બભાર હર્ષં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૦ ॥

યો વાનરીભ્ય ઉરુમૈત્રભરાન્વિતાભ્યઃ-
    આત્માટવીગમનહેતુમુદીરયન્તીમ્ ।
કાન્તાં વિલોક્ય મધુરં પ્રહસન્ જગામ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૧ ॥

યઃ સર્વમિત્રનિકરૈરનુજેન બધ્વા
    સાકં પુરન્દરપુરોહિતનન્દનસ્ય ।
પ્રાપ્યાશ્રમં તમભિવાદ્ય કૃતાર્થ આસીત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૨ ॥

યસ્તાપસેન ભૃશમર્ચિતમાત્મપુર્યાં
    શ◌ૃણ્વન્ સ્વબન્ધુકુશલાનિ તદીયવાચા ।
જ્ઞાત્વા નનન્દ ભરતસ્ય તપસ્વિવૃત્તિમ્ ।
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૩ ॥

યો વાયુજોદિતનિજાગમનશ્રુતિશ્રી-
    સમ્પૂર્ણચિત્તભરતં પ્રણતાઙ્ઘ્રિપદ્મમ્ ।

પ્રીત્યા નિજાङ્કમધિરોપ્ય તમાલિલિङ્ગ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૪॥

ભક્ત્યા ય આર્તજનનીમભિવાદ્ય ચાન્યાઃ
    પ્રીત્યા તદીરિતમહાશિષ આદધાનઃ ।
રેજે શતક્રતુરિવ પ્રસુવા સમેતઃ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૫॥

યઃ સોદરૈર્વનિતયા હરિભિશ્ચ નન્દિ-
    ગ્રામાત્ સમં નવસહસ્રગજાધિરૂઢૈઃ ।
પ્રાપ્યાભવત્ પ્રમદવાન્નગરીમયોધ્યાં
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૬॥

રાજ્યાવનક્ષમતમે ભરતપ્રણીતે
    સંયોજ્ય યઃ સ્વપદયોર્મણિપાદરક્ષે ।
પૂર્ણં મનોરથમહો ભરતસ્ય ચક્રે
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૭॥

યોઽનુગ્રહં હરિવરાય વિતીર્ય પૂર્વં
    પશ્ચાત્ સ્વયં નતવિભીષણદત્તહસ્તઃ ।
યસ્તાતવેશ્મ સમલङ્કૃતમાસસાદ
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૮॥

યુક્તે વસિષ્ઠગદિતે વિજયે મુહૂર્તે
    સિંહાસને રવિશતદ્યુતિરત્નદીપ્તે ।
અધ્યાસ્ય મેરુશિખરેઽર્ક ઇવાભિરેજે
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૯૯॥

યં વાયુજપ્રમુખવાનરવર્યનીત-
    ગङ્ગાદિસિન્ધુચતુરર્ણવપુણ્યતોયૈઃ ।
બ્રહ્માત્મજો મુનિવરો વિધિનાભ્યષિઞ્ચત્
    તં રામમાર્તિહરણ શરણં ભજામિ ॥ ૧૦૦॥

માન્યં મનુપ્રભૃતિભિર્મકુટં મહાર્ઘં
    મૌલૌ વસિષ્ઠમુનિના નિહિતં વહન્ યઃ ।
મધ્યેસભં વિરુરુચે મધુહેવ સાક્ષાત્
    તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૧॥

યસ્મિન્ સ્વયં ત્રિભુવનાવનદક્ષિણેન (ભારદક્ષે)
સર્વંસહાપતિપદે સહસાભિષેકૈઃ(ષિક્તે) ।
ભેજે મહી વસુમતીપદવાચ્યભાવં
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૨॥

કાન્તસ્ય યસ્ય જગતાં કલિતાભિષેકે
હૃષ્ટા બભૂવ ધરણીયમકૃષ્ટપચ્યા ।
ગાવઃ સુપુષ્ટવપુષો હ્યભવન્ ઘટોધ્નઃ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૩॥

યસ્મિન્ પ્રભૌ ભુવિ મહીસુરપૂર્વવર્ણા
આસન્નધર્મવિરતા નિજધર્મનિષ્ઠાઃ ।
અન્યોન્યવૈરવિમુખાઃ કરુણાર્દ્રચિત્તા-
સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૪॥

યસ્મિન્ ધરાં સમનુશાસતિ સર્વમર્ત્યા
અસન્ સહસ્રશરદાયુરનેકપુત્રાઃ ।
આઢ્યાઃ પ્રમોદભરિતાશ્ચ નિરામયાશ્ચ
તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૫॥

યસ્ય પ્રભુત્વપદમાવહતો ધરણ્યાં
સામન્તભૂમિપતયઃ સ્વયમઙ્ઘ્રિપદ્મે ।
નિક્ષિપ્તમૌલિમકુટાઃ કરદા બભૂવ-
સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૬॥

યસ્મિન્ ક્ષિતીશપદભાજિ ભુવિ પ્રભીતા
રક્ષઃપિશાચકુલદુર્ગ્રહભૂતવર્ગાઃ ।
ક્ષુદ્રાન્ જનાનપિ કદાપિ ન પીડયન્તિ
તે રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૭॥

જાતુ સ્મૃતે દુરિતહારિણિ યસ્ય નામ્નિ
નશ્યન્ત્યઘાનિ સકલાનિ પુરાકૃતાનિ ।
વાઞ્છાધિકાનિ કુશલાનિ ભવન્તિ સદ્ય-
સ્તં રામમાર્તિહરણં શરણં ભજામિ ॥ ૧૦૮॥

અષ્ટોત્તરૈકશતપદ્યસુપૂરિતેન

ભક્ત્યામુહુઃસ્તુતિવરેણ મયેડ્યમાનઃ ।
રામઃ સ એષ જનકાત્મજયા સમેતઃ
પ્રીતઃ સદાપિ હૃદયે મમ સન્નિધત્તામ્ ॥ ૧૦૯॥

ઇતિ શ્રીરામપ્રપત્તિશતકં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Ramaprapattishatakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*